स्यात् शास्त्योर्मिथोविरोधेन विभिन्नकर्म्मावच्छिन्ने प्रत्ययानां युगपत्कर्त्तृकर्म्मत्वयोरनुभावकत्वस्याव्युत्पन्नत्वात्। अतएव पचेलिमौ मैत्रतण्डुलावित्यादिकोन प्रयोगः "आत्मने भौव्यधातूनां सनन्तण्यन्तयोः किरः। श्रन्थिग्रन्थ्योस्तथा ब्रूञः कर्त्तृकर्मत्वबोधने। यगिणौ न दुहेर्नौ यगजन्तस्य च तस्य च। इण् वा स्यादुक्तधातूनां नित्यं तत्रात्मनेपद"मिति हरिस्मृतेः। स्वयं विकुरुते युवेत्यादौ, स्वयं चिकीर्षते कट इत्यादौ, स्वयं कटः कारयते गौरुत्पुच्छयते चोरयते इत्यादौ, स्वयमेव किरते करीत्यादौ, स्वयं श्रथ्नीते ग्रथ्नीते वा मालिकेत्यादौ, स्वयं ब्रूते कथेत्यादौ, स्वयं दुग्धे गौरित्यादौ, धात्वर्थकर्त्तृकर्म्मत्वयोर्युगपदन्वये कर्म्मत्वान्वयानुकूलस्य यकोनापेक्षा, तथा स्वयं व्यकृत युवा, स्वयमचिकीर्षत कट इत्यादौ, इणोऽपि एवं स्वयमलावि अलविष्ट वा केदार इत्यादौ, स्वरान्तस्य धातोः स्वयमदुग्ध अदोहि वा गौरित्यादौ, दुहेश्चाप्यस्य तदुभयभानार्थमिणोऽनावश्यकत्वमतउक्तमुत्सर्गत इति। "विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः" (कुमा०) इत्यादौ तु यकोगतिश्चिन्त्या। ननु शाकः पचता भुज्यते इत्यादितः कुतः पाकादौ शाकादिकर्मत्वावगमः सुवर्थस्यैव कर्मत्वस्य धात्वर्थे धर्म्मिणि साकाङ्क्षत्वादत आह। स्वकर्मकैकधात्वर्थकर्त्तृकापरकर्मता। यत्रान्वेत्यस्य कर्मत्वे प्रथमैवानुशिष्यते। स्वकर्मताकत्वविशिष्टैकधात्वर्थकर्त्तृकर्त्तृकस्यापरस्य धातुनिपातयोरन्यतरार्थस्य कर्मत्वं यत्र धर्म्मिण्यन्वेति तदीयत्वेनानुभाव्ये कर्म्मत्वे प्रथमैवानुशिष्यते नतु द्वितीयादिरपेक्ष्यते तेन शाकः स्वकर्मताकपाककर्त्तृकर्त्तृताकभोजनकर्मतावानित्याद्यन्वयधीस्तत्र स्यात्। अतएव "प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते" इति पठन्ति। शक्तिः कारकमिति शाब्दिकाः। कर्मतामात्रन्तु ज्यायः, तेन हस्तेन पचता भुज्यते शाक इत्यादौ नाभिहिताधिकारीयप्रथमा शक्तिः"।

अत्राभिहिताधिकारीयप्रथमाशक्तिरिति तु अनभिहिताधिकारीया न तृतीयाशक्तिरित्येतत् परम् अभिहिते प्रथमा इत्येतमधिकाराभावात् अनभिहिते इत्यस्यैवाधिकारादिति चिन्त्यम्। ६त०। २कर्मकारके त्रि०। स्त्रियां ङीप्। कृ-क्विप् ६त०। कर्मकृदप्यत्र। कर्मकरशब्दे उदा०।

कर्म्मकाण्ड न० कर्मणां कर्त्तव्यताप्रतिपादकं काण्डम्। कर्मणां कर्त्तव्यताप्रतिपादके वेदभागे कर्मकाण्डस्यारम्भप्रयोजनञ्च वृह० उ० भाष्ये दर्शितं यथा। "तत्रास्य कर्म्मकाण्डेन सम्बन्धोऽभिधीयते। सर्वोऽप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपरः सर्वपुरुषाणां निसर्गत एव तत्प्राप्तिपरिहारयोरिष्टत्वात्। दृष्टविषये चेष्टानिष्टप्राप्तिपरिहारोपायज्ञानस्य प्रत्यक्षानुमानाभ्यामेव सिद्धत्वान्नागमान्वेषणा। न चासति जन्मान्तरसम्बन्ध्यात्मास्तित्वविज्ञाने जन्मान्तरेष्टानिष्टप्राप्तिपरिहारेच्छा स्यात् स्वभाववादिदर्शनात्। तस्माज्जन्मान्तरसम्बन्ध्यात्मास्तित्वे जन्मान्तरेष्टानिष्टप्राप्तिपरिहारोपायविशेषे च शास्त्रं प्रवर्त्तते। "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" इत्युपक्रम्य "अस्तीत्येवोपलब्धव्यः" इत्येवमादिनिर्णयदर्शनात्। "यथा च मरणं प्राप्य" इत्युपक्रम्य "योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्" इति च, स्वयं ज्योतिरित्युपक्रम्य "तं विद्याकर्म्मणी समन्वारभेते पुण्योवै पुण्येन कर्म्मणा भवति"। ज्ञपयिष्यामीत्युपक्रम्य "विज्ञानमयः" इति च व्यतिरिक्तात्मास्तित्वम्। तत्प्रत्यक्षविषयमेवेति चेन्न वादिविप्रतिपत्तिदर्शनात्। न हि देहान्तरसम्बन्धिन आत्मनः प्रत्यक्षेणास्तित्वविज्ञाने लोकायतिका बौद्धाश्च नः प्रतिकूलाः स्युः नास्त्यात्मेति वदन्तः। न हि घटादौ प्रत्यक्षविषये कश्चिद्विप्रतिपद्यते नास्ति घट इति। स्थाण्वादौ पुरुषादिदर्शनान्नेति चेत् न निरूपितेऽभावात्। न हि प्रत्यक्षेण निरूपिते स्थाण्वादौ विप्रतिपत्तिर्भवति। वैनाशिकास्त्वहमितिप्रत्यये जायमानेऽपि देहान्तरव्यतिरिक्तस्य नास्तित्वमेव प्रतिजानते। तस्मात् प्रत्यक्षविषयवैलक्षण्यात् प्रत्यक्षान्नात्मास्तित्वसिद्धिः। तथानुमानादपि। श्रुत्यात्मास्तित्वे लिङ्गस्य दर्शितत्वात् लिङ्गस्य च प्रत्यक्षविषयत्वान्नेति चेत् न जन्मान्तरसम्बन्धस्याग्रहणात् आगमेन त्वात्मास्तित्वेऽवगते वेदप्रदर्शितलौकिकलिङ्गविशेषैश्च तदनुसारिणो मीमांसकास्तार्किकाश्चाहम्प्रत्ययलिङ्गानि च वैदिकान्येव स्वमतिप्रभवानीति कल्पयन्तो वदन्ति प्रत्यक्षश्चानुमेयश्चात्मेति। सर्वथाप्यस्त्यात्मा देहान्तरसम्बन्धीत्येवं प्रतिपत्तुर्देहान्तरगतेष्टानिष्टप्राप्तिपरिहारोपायविशेषार्थिनस्तद्विशेषज्ञापनाय कर्म्मकाण्डं समारब्धम्"। अधिकारिभेदेनैव कर्मकाण्डे प्रवृत्तिः "लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ!। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्" इति गीतायामपि द्वैविध्योक्तेः अतएव "तमेतं ब्राह्मणा विविदिषन्ति वेदानुवचनेन यज्ञेन